| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

**राजकीय उच्च माध्यमिक विद्यालय, समेलिया**

**प्री बोर्ड उच्च माध्यमिक परीक्षा-2025**

**कक्षा-10**

**समय: 3 घण्टे 15 मिनट** **विषय :- संस्कृत** **पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः -**

**1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतो लेख्यः।**

**2. सर्वे प्रश्नाः अनिवार्याः ।**

**3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि।**

**4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।**

**5. सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि ।**

**(खण्ड-अ)**

**प्रश्न 1. बहुविकल्पात्मकप्रश्नाः -**

(i) 'विचित्रः साक्षी' इति पाठः केन विरचितः ? (1)

(अ) ओमप्रकाश ठाकुरेण (ब) हरिदत्तशर्मणा (स) सुश्रुतेन (द) कालिदासेनं

(ii) बुद्धिमान् नरः कीदृशं कर्म न कुर्यात् ? (1)

(अ) हितकरम् (ब) सुखदम् (स) अहितम् (द) मधुरम्

(iii) गुर्जरराज्ये कदा भूकम्पविभीषिका समुत्पन्ना ? (1)

(अ) 2000 ई. वर्षे (ब) 2001 ई. वर्षे (स) 2005 ई. वर्षे (द) 2010 ई. वर्षे

(iv) सरसः शोभा केन भवति ? (1)

(अ) बकेन (ब) गजेन (स) मकरेण (द) राजहंसेन

(v) अत्र जीवितम् कीदृशं जातम् ? (1)

(अ) दुर्वहम् (ब) सरलम् (स) सुखदम् (द) उन्नतम्

(vi) राजपुत्रस्य किन्नाम आसीत् ? (1)

(अ) मानसिंहः (ब) देवसिंहः (स) राजसिंहः (द) अमरसिंहः

(vii) वयोऽनुरोधात् कः लालनीयः भवति? (1)

(अ) नृपपुत्रः (ब) शिशुजनः (स) पिता (द) मित्रम्

(viii) 'इतः ततः' इत्यस्य सन्धिपदमस्ति- (1)

(अ) इततः (ब) इत ततः (स) इतर्ततः (द) इतस्ततः

(ix) जश्त्वसन्धेः उदाहरणमस्ति- (1)

(अ) बुद्धिः (ब) उत्पन्नः (स) कृष्णः (द) कश्चित्

(x) रुत्वसन्धेः उदाहरणमस्ति- (1)

(अ) वागीशः (ब) राजेशः (स) प्रातरुदेति (द) एषोऽपि

(xi) 'दिगम्बरः' इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति (1)

(अ) दिग अम्बरः (ब) दिक् अम्बरः (स) दिगम् बरः (द) दिक् + गम्बरः

(xii) 'अधिशेते' इति पदयोगे का विभक्तिः भवति ? (1)

(अ) सप्तमी (ब) पञ्चमी (स) तृतीया (द) द्वितीया

(xiii) दानार्थे 'दा' धातुयोगे का विभक्तिः भवति ? (1)

(अ) चतुर्थी (ब) पञ्चमी (स) द्वितीया (द) षष्ठी

(xiv) 'अपभ्रंशः' इत्यत्र पदे कः उपसर्गः? (1)

(अ) प्र (ब) आङ् (स) अप (द) अव

(xv) 'निर्वेदः' इत्यत्र उपसर्ग शब्दं च पृथक् कृत्वा लिखत- (1)

(अ) नि + वेदः (ब) निर् + वेदः (स) निस् + वेदः (द) नव + रेदः

(xvi) 'नृत्' धातोः लृटलकारे उत्तमपुरुषस्य बहुवचने किं रूपं भवति ? (1)

(अ) नृत्यामः (ब) नृत्याम (स) नर्तिष्यन्ति (द) नर्तिष्यामः

(xvii) 'जन्' धातोः ललकारे मध्यमपुरुषैकवचने किं रूपं भवति ? (1)

(अ) अजाये (ब) जाये (स) जायै (द) जायेम

प्रश्न 2. निर्देशानुसारं रिक्तस्थानानि पूरयत-

(i) .......... सर्वत्र पूज्यते। (ज्ञान + क्तवतु) (1)

(ii) .......... वृक्षे तिष्ठति। (चटक टाप्) (1)

(iii) नगरे .......... मानता वसति। (जन + तल्) (1)

(iv) मम उपरि .......... कृपा अस्ति। (हरि-शब्दस्य षष्ठीविभक्ति एकवचनम्) (1)

(v) सुरेशस्य ........... विश्वासः अस्ति। (अस्मद्-शब्दस्य सप्तमीविभक्ति एकवचनम् (1)

प्रश्न 3. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत -

ज्ञानार्थक-विद्धातोः विद्याशब्दः सिद्ध्यति। कस्यचिदपि वस्तुनः पदार्थस्य वा सम्यक् ज्ञानं विद्येति कथ्यते। वेदशास्त्र-विज्ञानादीनां साध्वनुशीलनं तत्वार्थज्ञानं च विद्येति स्वीक्रियते । विद्याधनं सर्वधनं प्रधानमस्ति। विद्यद्यैव तद् धनम् यया मानवीयो मनोरथोऽभिलाषा वा पूर्यते । विद्ययैव कर्त्तव्याकर्त्तव्यज्ञानं धर्माधर्म परिज्ञानम् पुण्यापुण्यविवेकः लाभालाभावबोधश्च भवति। व्यये कृतेऽपि विद्या वर्धते ।

अस्मिन् समये विद्यायाः अतिमहत्वं वर्तते। विद्याविहीनस्तु मानवः साक्षाद् पशुरेव वर्तते। विद्ययैव मनुष्यः सर्वत्र प्रतिष्ठां प्राप्नोति । विद्या एव जगति मनुष्यस्य उन्नतिं करोति। विद्या दुःखेषु विपत्तिषु च तस्य रक्षां करोति। विद्या कीर्तिं धनं च ददाति। विद्या वस्तुतः कल्पलता इव विद्यते ।

प्रश्नाः- (क) एकपदेन उत्तरत- (1X2=2)

(i) ज्ञानार्थक-विद्धातोः कः शब्दः सिद्ध्यति ?

(ii) सर्वधनं प्रधानं किमस्ति ?

ख) पूर्णवाक्येन उत्तरत- (2)

कीदृशं ज्ञानं विद्येति कथ्यते?

(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । (1)

(घ) भाषिककार्यम् - (1X3=3)

(i) 'प्राप्नोति' इति प्रदत्तविकल्पेभ्यः गद्यांशे कर्तृपदं किमस्ति ?

(ii) 'विद्याविहीनः' इति विशेषणस्य विशेष्यपदं किम् ?

(iii) ".....तस्य रक्षां करोति।" इत्यत्र 'तस्य' सर्वनामपदस्थाने संज्ञापदं लिखत ।

<u>(खण्ड-ब)</u>

प्रश्न 4. 'हरये' रोचते भक्तिः। रेखांकितपदे विभक्तिं तत्कारणं च लिखत । (2)

प्रश्न 5. अधोलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत - (i) 165 (ii) 585 (1X2=2)

प्रश्न 6. राजा तु <u>रक्षकः</u> भवति। रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत। (2)

प्रश्न 7. अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसङ्ग भावार्थ लिखत । (2)

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः ॥

प्रश्न 8. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत- (2)

संपत्ती च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा ॥

अन्वयः- महताम् (i).....च विपत्ती च (ii) ..... (भवति)। (यथा) सविता (iii) .....रक्तः (भवति), तथा (iv) .....च रक्तः (भवति)।

(उदये, सम्पत्तौ, अस्तमये, एकरूपता)

प्रश्न 9. स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत यद् अस्मिन् प्रश्नपत्रेन स्यात् । (2)

प्रश्न 10. " 'सौहार्द' प्रकृतेः शोभा" इति पाठसारं हिन्दीभाषायां लिखत । (2)

अथवा

"विचित्रः साक्षी" इति पाठसारं हिन्दीभाषायां लिखत ।

(खण्ड-स)

प्रश्न 11. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-

"बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि । यतो हि अयमन्येभ्यो दुर्बलः । सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत्-"गच्छ वत्से! सर्वं भद्रं जायेत।"

प्रश्नाः (क) एकपदेन उत्तरत- (1)

सुरभेः कति अपत्यानि सन्ति ?

(ख) पूर्णवाक्येन उत्तरत- (2)

कस्मिन् मातुः अभ्यधिका कृपा सहजैव भवति ?

(ग) भाषिककार्यम् - (1+1=2)

(i) 'दुर्बले' इति विशेषणस्य विशेष्यपदं किं प्रयुक्तम्?

(ii) 'स च तामेवमसान्त्वयत्।' अत्र 'ताम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

अथवा

इयमासीत् भैरवविभीषिका कच्छभूकम्पस्य। पञ्चोत्तर द्विसहस्त्रख्रीष्टाब्दे (2005 ईस्वीये वर्षे) अपि कश्मीरप्रान्ते पाकिस्तानदेशे च धरायाः महत्कम्पनं जातम्। यस्मात्कारणात् लक्षपरिमिताः जनाः अकालकालकवलिताः। पृथ्वी कस्मात्प्रकम्पते वैज्ञानिकाः इति विषये कथयन्ति यत् पृथिव्या अन्तर्गर्भे विद्यमानाः बृहत्यः पाषाण-शिला यदा संघर्षणवशात् त्रुट्यन्ति तदा जायते भीषणं संस्खलनम्, संस्खलनजन्यं कम्पनञ्च। तदैव भयावहकम्पनं धराया उपरितलमप्यागत्य महाकम्पनं जनयति येन महाविनाशदृश्यं समुत्पद्यते ।

प्रश्नाः (क) एकपदेन उत्तरत- (1)

इयं कस्य भैरवविभीषिका आसीत् ?

(ख) पूर्णवाक्येन उत्तरत- (2)

पृथिव्याः अन्तर्गर्भे काः विद्यमानाः सन्ति?

(ग) भाषिककार्यम्- (1+1=2)

(i) 'पाषाणशिला' इति विशेष्यपदस्य विशेषणपदं किम्?

(ii) 'कथयन्ति' इति क्रियायाः गद्यांशे कर्तृपदं किमस्ति ?

प्रश्न 12. अधोलिखितं पद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचि... ।।

प्रश्नाः- (क) एकपदेन उत्तरत- (1)

किं भृशं दूषितम् ?

(ख) पूर्णवाक्येन उत्तरत- (2)

अधुना भक्ष्यं कीदृशम् अस्ति ?

(ग) भाषिककार्यम्- (1+1=2)

(i) 'धरातलम्' इत्यस्य पदस्य पद्यांशे विशेषणपदं किम् अस्ति ?

(ii) 'निर्मलम्' इत्यस्य पदस्य पद्यांशे विशेष्यपदं किम्?

**अथवा**

**आश्वास्य पर्वतकुलं तपनोष्णतप्त-**

**मुद्दामदावविधुराणि च काननानि।**

**नानानदीनदशतानि च पूरयित्वा,**

**रिक्तोऽसि यज्जलद ! सैव तवोत्तमा श्रीः ॥**

**प्रश्नाः- (क) एकपदेन उत्तरत- (1)**

**तपनोष्णतपतं किमस्ति ?**

**(ख) पूर्णवाक्येन उत्तरत- (2)**

**जलदः कीदृशानि काननानि पूरयति ? तथा कीदृशं पर्वतकुलम् आश्वासयति ?**

**(ग) भाषिककार्यम्- (1+1=2)**

**(i) 'तव' इति सर्वनामपदं पद्यांशे कस्मै प्रयुक्तम् ?**

**(ii) 'उत्तमा श्रीः' इत्यत्र विशेष्यपदं किमस्ति ?**

**प्रश्न 13. अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-**

**रामः - कथमस्मत्समानाभिजनौ संवृत्तौ ?**

**विदूषकः किं द्वयोरप्येकमेव प्रतिवचनम् ?**

**लवः- भ्रातरावावां सोदर्यौ।**

**रामः - समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।**

**लवः- आर्वा यमली।**

**रामः - सम्प्रति युज्यते। किं नामधेयम् ?**

**लवः- आर्यस्य वन्दनायां लव इत्यात्मानं आवयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम्………..।**

**कुशः- अहमपि कुश इत्यात्मानं श्रावयामि।**

**रामः - अहो ! उदात्तरम्यः समुदाचारः ।**

**किं नामधेयो भवतोर्गुरुः?**

**प्रश्नाः (क) एकपदेन उत्तरत- (1)**

**लवकुशयोः शरीरसन्निवेशः कीदृशः आसीत्?**

**(ख) पूर्णवाक्येन उत्तरत- (2)**

**कयोः एकमेव प्रतिवचनम् आसीत्? तथा तयोः समुदाचारः कीदृशः आसीत् ?**

**(ग) भाषिककार्यम्- (1+1=2)**

**(i) 'कथमस्मत्समानाभिजनी..' इत्यत्र 'अस्मत्' सर्वनामपदं कस्मै प्रयुक्तम् ?**

**(il) 'समुदाचारः' इत्यस्य विशेषणपदं नाट्यांशात् चित्वा लिखत।**

**अथवा**

**काकः - रे परभृत्! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।**

**गजः - समीपतः एवागच्छन् अरे! अरे! सर्वां वार्ता शृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकायः, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि। वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी। अतः अहमेव योग्यः वनराजपदाय।**

**वानरः - अरे! अरे! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति।)**

**प्रश्नाः (क) एकपदेन उत्तरत- (1)**

**काकः कस्य सन्ततिं पालयति ?**

**(ख) पूर्णवाक्येन उत्तरत- (2)**

**गजः कीदृशः अस्ति? सः गजः कम् स्वशुण्डेन पोथयित्वा मारयिष्यति?**

**(ग) भाषिककार्यम्-** **(1+1=2)**

**(i) 'अहम् एव करुणापरः।' अत्र 'अहम्' सर्वनामपदं कस्मै प्रयुक्तम् ?**

**(ii) 'आगच्छम्' इति क्रियापदस्य कर्तृपदं किम् ?**

**प्रश्न 14. यथानिर्देशम् उत्तरं लिखत-** **(1+1+1=3)**

**(क) माता च पिता च (समस्तपदं लिखत) (ख) प्रतिवारम् (समासविग्रहं कुरुत) (ग) महाराजः (समासस्य नाम लिखत)**

**प्रश्न 15. मञ्जूषायाः प्रदत्तैः समुचितैः अव्ययपदैः वाक्यानिपूरयत। [उच्चैः, बहिः, सदा]** **(1+1+1=3)**

**(i) ………… समयस्य सदुपयोगः करणीयः।**

**(ii) भूकम्पित-समये ………… गमनमेव उचितं भवति ।**

**(iii) सः गायकः ………… गीतं गायति।**

**(खण्ड-द)**

**प्रश्न 16.स्वं' अभ्युत्कर्षः' मत्वा राजकीय उच्च माध्यमिक विद्यालयस्य उदयपुरस्य प्रधानाचार्यमहोदयाय विद्यालये क्रीडाव्यवस्थार्थ संस्कृते प्रार्थनापत्रं लिखतु ।** **(4)**

**अथवा**

**भवान् सुरेशः। मातरं प्रति अधोलिखितं पत्रं मञ्जूषापद सहायतया लिखत ।**

**[वार्षिकोत्सवः, अभिनयम्, मुख्यातिथिः, कुशलम्, अध्ययनम्, पितरम्, भवदीयः, सर्वेभ्यः]**

**चारुनगरात्**

**दिनांका: 11/02/20××**

**पूजनीयाः मातृचरणाः !**

**नमोनमः। अत्र (1).......... तत्रास्तु। मम विद्यालये (ii) ……… आसीत्। तत्र अहम् एकम् (iii).......... कृतवान् । मन्त्रिमहोदयः (iv) ………. रूपेण आगतवान्। मम (v) ……… सम्यक् चलति। गृहे (vi) ………… नमोनमः। अहं (vii)........... प्रणमामि ।**

**(viii)..........**

**सुरेशः**

**प्रश्न 17. अधः प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्ट वाक्यानि उद्यानविषये लिखत-** **(4)**

**[उपवनम्, पुष्पाणि, नारी, सूर्यः, खगाः, आकाशे, कलरवम्, राजमार्गः, बालकः, बालिका, भ्रमन्ति]**



**अथवा**

मञ्जूषातः उपयुक्तपदानि गृहीत्वा पितापुत्रयोः मध्ये योगदिवसविषये वार्तालापं पूरयतु-

[कुर्वन्ति, आगच्छ, जूनमासस्य, कार्यक्रमाः, शक्नोमि, अस्माकम्, योगदिवसे, अन्तर्राष्ट्रिययोगदिवसः]

पुत्रः - भोः पितः ! ......... 21 दिनांके कः दिवसः भवति ?

पिता- अरे ! तस्मिन् दिने तु भवति ।

पुत्रः-योगदिवसे के ......... भवन्ति ?

पिता- ......... विश्वेजनाः प्रणायामं व्यायामं च कुर्वन्ति ।

पुत्रः-योगेन ......... स्वास्थ्यं सम्यक् भवति वा?

पिता-आम्। ये योगं ......... ते रुग्णाः न भवन्ति ।

पुत्रः-तर्हि अहम् अपि योगं कर्तुं ......... वा?

पिता-किमर्थं न, ......... आवां योगं करवाव।

**प्रश्न 18.** अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं कुरुत। (4)

(i) सज्जन दुर्जनों से डरते हैं।

(ii) यह गोपाल का भाई है।

(iii) सीता पुष्प सूँघती है।

(iv) बालक घर की ओर जा रहे हैं।

(v) मोहन चलता हुआ गिर पड़ा।

(vi) सभा में कवि कविता पढ़ते हैं।

**प्रश्न 19.** अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत। (4)

(i) वन्यजन्तुषु तस्य आधिपत्यम् अभवत् ।

(ii) सर्वे शृगालाः महाशब्दं कृतवन्तः ।

(iii) शृगालः वनात् नगरम् आगतः ।

(iv) शृगालः उत्थाय वनं प्रति पलायितः।

(v) शृगालः नीलीभाण्डे पतितः।

(vi) सः अन्यान् शृगालान् दूरं कृतवान् ।

**अथवा**

अधः मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन षड् वाक्यानि 'वर्षावर्णनम्' इति विषये लिखत-

मेघाः, वर्षाऋतुः, कर्गदनौकाः, आतपत्रम्, बालकाः, वर्षन्ति, चालयन्ति, मयूराः, सर्वत्र, जले, जलम्, हरीतिमा, वर्षा, ऋतुराज्ञी, जलबिन्दवः, आकाशे

****************************************************